श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चाशीतितमः सर्गः ॥

## इन्द्रे तदीये वज्रादौ च वैष्णवतेजसः प्रवेश इन्द्रवज्रेण वृत्रस्य वधो ब्रह्महत्ययाऽऽक्रान्तस्येन्द्रस्य तमोमयप्रदेशे गमनम्

लक्ष्मणस्य तु तद् वाक्यं श्रुत्वा शत्रुनिबर्हणः।
वृत्रघातमशेषेण कथयेत्याह सुव्रत ॥ **7.85.1** ॥

राघवेणैवमुक्तस्तु सुमित्रानन्दवर्धनः।
भूय एव कथां दिव्यां कथयामास सुव्रतः ॥ **7.85.2** ॥

सहस्राक्षवचः श्रुत्वा सर्वेषां च दिवौकसाम्।
विष्णुर्देवानुवाचेदं सर्वानिन्द्रपुरोगमान् ॥ **7.85.3** ॥

पूर्वं सौहृदबद्धोऽस्मि वृत्रस्येह महात्मनः।
तेन युष्मत्प्रियार्थं हि नाहं हन्मि महासुरम् ॥ **7.85.4** ॥

अवश्यं करणीयं च भवतां सुखमुत्तमम्।
तस्मादुपायमाख्यास्ये सहस्राक्षो वधिष्यति ॥ **7.85.5** ॥

त्रेधाभूतं करिष्यामि आत्मानं सुरसत्तमाः।
तेन वृत्रं सहस्राक्षो वधिष्यति न संशयः ॥ **7.85.6** ॥

एकांशो वासवं यातु द्वितीयो वज्रमेव तु।
तृतीयो भूतलं यातु तदा वृत्रं हनिष्यति ॥ **7.85.7** ॥

तथा ब्रुवति देवेशे देवा वाक्यमथाब्रुवन्।
एवमेतन्न सन्देहो यथा वदसि दैत्यहन्॥ **7.85.8** ॥

भद्रं तेऽस्तु गमिष्यामो वृत्रासुरवधैषिणः।
भजस्व परमोदार वासवं स्वेन तेजसा॥ **7.85.9** ॥

ततः सर्वे महात्मानः सहस्राक्षपुरोगमाः।
तदरण्यमुपाक्रामन् यत्र वृत्रो महासुरः॥ **7.85.10** ॥

तेऽपश्यंस्तेजसा भूतं तप्यन्तमसुरोत्तमम्।
पिबन्तमिव लोकांस्त्रीन् निर्दहन्तमिवाम्बरम्॥ **7.85.11** ॥

दृष्ट्वैव चासुरश्रेष्ठं देवास्त्रासमुपागमन्।
कथमेनं वधिष्यामः कथं न स्यात् पराजयः॥ **7.85.12** ॥

तेषां चिन्तयतां तत्र सहस्राक्षः पुरन्दरः।
वज्रं प्रगृह्य पाणिभ्यां प्राहिणोद् वृत्रमूर्धनि॥ **7.85.13** ॥

कालाग्निनेव घोरेण दीप्तेनेव महार्चिषा।
पतता वृत्रशिरसा जगत् त्रासमुपागमत्॥ **7.85.14** ॥

असम्भाव्यं वधं तस्य वृत्रस्य विबुधाधिपः।
चिन्तयानो जगामाशु लोकस्यान्तं महायशाः॥ **7.85.15** ॥

तमिन्द्रं ब्रह्महत्याऽऽशु गच्छन्तमनुगच्छति।
अपतच्चास्य गात्रेषु तमिन्द्रं दुःखमाविशत्॥ **7.85.16** ॥

हतारयः प्रणष्टेन्द्रा देवाः साग्निपुरोगमाः।
विष्णुं त्रिभुवनेशानं मुहुर्मुहुरपूजयन्॥ **7.85.17** ॥

त्वं गतिः परमेशान पूर्वजो जगतः पिता।
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान्॥ **7.85.18** ॥

हतश्चायं त्वया वृत्रो ब्रह्महत्या च वासवम्।
बाधते सुरशार्दूल मोक्षं तस्य विनिर्दिश॥ **7.85.19**॥

तेषां तद् वचनं श्रुत्वा देवानां विष्णुरब्रवीत्।
मामेव यजतां शक्रः पावयिष्यामि वज्रिणम्॥ **7.85.20**॥

पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः।
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः॥ **7.85.21**॥

एवं सन्दिश्य तां वाणीं देवानां चामृतोपमाम्।
जगाम विष्णुर्देवेशः स्तूयमानस्त्रिविष्टपम्॥ **7.85.22**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चाशीतितमः सर्गः॥